No. १४१२

Title माधुर्यां अनुमान परिच्छेद रहस्ये
अर्थापत्ति रहस्यं

Author ×

Extent ८३ Age ×

Subject न्याय वैशेषिकं

मूलमाध्यमं अनुमानपरिच्छेदरहस्ये

पूर्वपक्षरहस्यम्

२२ पत्र

१५१२

हकत्वेपि तद्विशिष्टसाध्यसमानाधिकरणात्यंताभावाप्रतियोगि तद्रूपव्यापकताया आर्द्रेन्धनादावनपायात् यावियद्वृत्ति
यत्तद्धर्माभावात् आर्द्रेन्धनादेः शुद्धसाध्यव्यापकताग्रहकालेऽवश्यं पक्षधर्मविशिष्टव्यापकताग्रहो भवति तादृशपक्ष
वृत्तिधर्माभावादित्यर्थः तथा च पक्षार्द्रेन्धनादेः पक्षवृत्तिधर्मावच्छिन्नसाध्यव्यापकताग्रहो ना(स्ति) शुद्धसाध्यव्यापकताग्रहो वर्त्त
ते तत्राविद्यमानत्वग्रहप्रतिबंधाज्ज्ञानाव्याप्तिरिति भावः। केचित्तु। तत्र पक्षधर्मे पक्षेतरपक्षवृत्तिधर्मे वा समुत्कर्षे किं वा पक्षमात्रवृ
त्तिधर्मे आद्ये ज्ञानाव्याप्तिमाहुरशक्तेति। अंत्ये वसत्वव्याप्तिमाह आर्द्रेति। ऊहे धूमवान् वह्नेरित्यादौ आर्द्रेन्धनादावव्याप्ति
रित्यर्थः। आदिना वायुः प्रत्यक्षस्पर्शाश्रयत्वाद्युद्भूतरूपादिपरिग्रहः। अत एव पक्षान्तिमपदे सुकरमित्याहुः तन्न त्वि इं पूर्वलक्षणेऽप्यु
पाधिः संभवति जन्यत्वस्यापि पक्षधर्मत्वादित्यत आह श्यामत्वेति। मित्रातनयत्वेन काकादेः श्यामत्वसाधनेऽत्यर्थः।
विरुद्धस्य लोपोपाधावव्याप्तिसत्वेपि स्फुटत्वात् तदुपेक्ष्य तं तस्माह पक्षमिति। वायुः प्रत्यक्षः प्रमेयत्वादित्यादौ वायु
द्भूतरूपादावव्याप्तिरित्यर्थः। ननु वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यादौ वायुद्भूतरूपादेरित्यर्थः। तत्र साधनीभूतप्रत्यक्ष
स्पर्शाश्रयत्वावच्छिन्नसाध्यव्यापकत्वस्याविसत्वेनाव्याप्त्यभावादित्यदृष्टव्यापकत्वं वज्ञानाति व्याप्तिमाह जन्यत्वमिति। उपाधि
त्वप्रसंगात्। उपाधित्वज्ञानप्रसंगात्। पक्षेसाध्याव्यापकतया न स्वव्याप्तिरमावात। नान्वेहत्वितथा ज्ञानदृशायां तस्याविद्य
मानत्वमस्त्येवेति तस्य तथात्वानं नहीत्याये त्यत आह सोपाधित्वादिति। वह्निमत्वधूमसाधके सोपाधित्वादित्यत्र साधकत्वा
नुमानेऽइत्यर्थः। साधनावच्छिन्नसाध्यव्यापकव्याप्ति चारित्व इति। व्यभूवच्छिन्न धमव्यापक व्याप्ति चारित्वरूपे सोपाधित्वेहेतावि म

मू. टी. र्थः। साधनावच्छिन्नेत्यस्येति। वह्न्यवच्छिन्नधूमव्यापकव्यभिचारित्वं वह्न्यवच्छिन्नधूमव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिता
काभाववद्वृत्तित्वं वह्न्यवच्छिन्नधूमसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकरूपावच्छिन्नप्रतियोगिताकाभाववद्वृ
2 त्तित्वमिति यावत्। तत्र वह्न्यवच्छिन्नधूमसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकत्वाभाववद्धूमसमानाधिकरणात्यन्ता
भावप्रतियोगितावच्छेदकत्वाभावयोर्भेदाभावेन वह्न्यवच्छिन्नेत्यस्य वैयर्थ्यप्रसंगादित्यर्थः। ननु तादृशाभावयोर्भेदाभावे विषयप्र
संनिवेशे न वैयर्थ्यम्। अन्यथा तत्तादिसाध्यव्यापकव्यभिचारित्वादिसत्त्वे साध्यव्यापकेत्यस्य वैयर्थ्य। साध्यव्यभिचारित्वमात्रस्यैव स
म्भवात्। साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववत्साध्यव्यापकतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववत्तया तत्सा
पिसाध्यव्यापकव्यभिचारित्वघटकत्वात्। वस्तुतस्तु आर्द्रेन्धनादिव्याप्यत्वादित्यादिप्रातिस्विकरूपेणैव वा साधकत्वं साध्ये तेन
गुणसामान्यतः साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वेनेति कथं वैयर्थ्यमिति भावः। ननु सत्त्वरसादाहृत्य किं चेति। पक्षदृश्येपीति। तदृशा
दृश्येपीत्यर्थः। प्रसाध्येति। उपाधिव्यभिचारेण उपाधिव्यतिरेकेण वा प्रसाध्येत्यर्थः। साधनीय इति। विशेषणव्यभिचारित्वे सति
विशिष्टसाध्यव्यभिचारित्वेन विशेषणवत्त्वे सति विशिष्टसाध्याभाववत्त्वेन वा हेतुना साधनीय इत्यर्थः। उपाधेः शुद्धसाध्यव्याप
कतातदभावेन तद्व्यभिचारेण तदभावे न वा शुद्धसाध्यव्यभिचारस्य शुद्धसाध्यव्यतिरेकस्य वा साधनासंभवात्। अनुकूलत
र्कविरहादिति भावः। परं परस्य प्रकृतोपयोगेनात्पर्यंतरामिमाशंकते। अपीति। अप्रामकोलेत्यादि। प्रथमं विशिष्टसाध्यव्य
भिचारस्यानाकांक्षितत्वाभिधानत्वादित्यर्थः। प्रभाकरमतं शंकते प्रथमेति। उद्भाव्यः। विशेषणाव्यभिचारित्वे सति विशिष्टसाध्यव्यभि रणम
चारेण साध्यः। तत्रापि सिद्धावपीति। तत्र विशिष्टसाध्यव्यभिचारे। सिद्धावुद्भावितायां तत्सिद्धये उपाधिरुद्भाव्य इत्यर्थः। प्रकृतेति। प्रकृता

नुमानविरोधिशुद्धसाध्यव्यभिचारासाधकत्वादिति भावः। ननु विशिष्टसाध्यव्यापकत्वज्ञानेनापि विशेषणे वति उपाधिव्यभिचा
रित्वेन हेतुनाशुद्धसाध्यव्यभिचारानुमानं संभवति विशेषणाव [illegible] विशिष्टसाध्यव्यापकव्यभिचारित्वे विशेष्यव्यभिचारस्यावश्यक
त्वादित्यत आह - किं चेति। पक्षधर्मेति। साधनस्याप्युपलक्षणं। पक्षधर्मसाधनावच्छिन्नसाध्यव्यापकस्योपाधेर्व्यभिचार एवो
पन्यासे तदनुचितमित्यर्थः। तो पाधिः। तत्रैव तो पाधिः। न चैवं पाति [illegible] पक्षे प्रदर्शयविशेषादिदूषणे तावदुपाधित्वं हेतुः सोपाधिरिति
वस्तुकलत्कपकेरु [illegible] नादिति भावः। इदं च दूषणं सर्वत्रैव बोध्यं। न केवलमिति। अपि [illegible] व्यभिचारित्वादिति संबंधेनोपाधिरपि स्व
वे हेतुः संभवति तथा व्यापकसमाधानस्य यदुक्तं वागप्रकृते वव्यमाणत्वोल्लासंगतिः। व्यभिचारितादिसंबंधस्य दृष्टान्तिव्या
पकतया नव्यापकताव [illegible] त्वात् [illegible] मानेनेत्यपि केचित्तदासार [illegible] लकोशकारतं ज्ञानमाशंक्य तो स्यादेतदिति। एतन्न दूषणं पक्षेऽसत्प्र
तिपक्षो लापकत्वं दूषकताबीजमेव साधनाव्यापकत्वविशिष्टं सत्त्वस्य तानितिपानकं ननु व्यभिचारो लापकत्वं पक्षधर्मतावलम्ब
व्यभिचारज्ञानस्य प्रकृतानुमानमूलभंगसाध्यतावच्छेदकावच्छिन्नसाध्यव्याप्तिज्ञानविरोधितया अकिंचित्करत्वादिति ध्येयं। अ
नित्यत्वादीति। केति। अनित्यत्वादीति रिक्तो यः शब्दधर्मस्तद्वृत्तिरिक्तो यो धर्मस्तद्वृत्तित्वर्थः। पर्यवसितं तत्साधनमिति सत्त्वमिति। अनित्य
त्वातिरिक्तो यः शब्दधर्मस्तद्वृत्तिरिक्तं विशिष्टाभावत्वादुभयवे शब्दधर्मातिरिक्तं घटत्वादिकमपि सत्त्वं च तत्राप्याधेयाधारस्येति सत्त्वस्यैव
पक्षधर्मतावलेन सिद्धत्वादिति भावः। तस्य व्यापकमिति। शुद्धसाध्यस्य केवलान्वयितया तद्व्यापकत्वासंभवादिति भावः। न चेदं सदनु
मानमेवेति कथमत्रोपाधिरिति वाच्यं। मीमांसकमते न तद्विधानात्। गैः शब्दस्यानित्यत्वे गीकारात्। यद्वा शब्दपदं दृष्टांतपरं। त
थाच शब्दत्वमतिसत्त्वातिरिक्तशब्दत्वधर्मातिरिक्तधर्मवत्त्वमेव त्वादित्यत्रैसर्थः। उदाहरणान्तरमाह। यदीति। नच्येवेति शब्द

म.टी. 3

त्वं हेतुकत्वातिरिक्तशाखात्वधर्मातिरिक्तधर्मवत्त्वमेव तत्त्वादित्याहुः क्रमेणेत्यर्थः । तदा अनित्यत्वमिति । पक्षधर्मतावच्छेदकस्य हेतु-
त्वे तस्य व्यापकत्वादिति भावः । न चैवं पर्वतो वह्निमान् धूमादित्यादौ पर्वतीयवह्निव्यापकत्वात् सर्वत्वपाषाणमयत्वादावतिव्याप्ति-
रिति वाच्यं । पक्षावृत्तित्वे सतीत्यनेन तद्विशेषणीयत्वादिति हृदयं । पक्षधर्मतावच्छेदकसाध्याव्यापकस्योपाधित्वे प्राचां संवादमाह । तदु-
क्तमिति । वायुर्बहिःसाधनतावच्छेदकावच्छिन्नं साध्यमेव तन्नियमव्याप्तो पि । तद्व्यापकतादाहितोपि । पर्वतवृत्तित्वे नियमव्याप्त्यनुपा-
धिः । पक्षधर्मतावच्छेदकस्य व्याप्ती कुर्वत्तूपाधिः कल्पके तत्सिद्ध्यर्थ इत्यर्थः । उद्भावने हेतुमाह । हेतुकेति । सत्प्रतिपक्षोन्नायकत्व-
स्य हेतुव्यवस्थापकताबीजस्य सत्त्वादित्यर्थः । एवं हेत्वादि पक्षधर्मतावच्छेदकेनानित्यत्वस्य समवेतत्वासिद्धे चेन्न समवेतत्वद्रव्यसमवेतत्वयो-
र्बाधस्थेरणप्रसाधकत्वादिति । द्रव्यसमवायिकारणकत्वे सिद्धे इत्यर्थः । जन्यमहत्त्वेति । अत्र द्रव्यत्वमात्रस्य हेतुत्वे घटादौ व्यभिचा-
रः स्यात् तदधिकरणत्वं । तथा आत्मादावपि व्यभिचार इति द्रव्यत्वोपादानं । जन्यानधिकरणद्रव्यत्वस्याप्रसिद्धत्वात् महत्त्वेति ।
परमाणौ सिद्धसाधनतावारणाय महत्त्वपर्यन्तं । सिद्ध्यर्थमाहोपन्यस्येति । अखण्डाभावत्वात् इत्यन्वयः पर्यवसितमित्येवं । उपाधिः स्यादिति । उपा-
धित्वे तज्ज्ञानं स्यादित्यर्थः । पक्षे पर्यवसितसाध्याव्यापकत्वे नवत्वतिव्याप्तेरभावात् । अत्र समवेतत्वमात्रस्य पक्षावृत्तित्वात् । स्प-
र्शद्रव्येति । पर्यवसितसाध्यसमव्याप्त एवोपाधिरिति परिहरिष्यन् आह । तदाप्यतिव्याप्तिरिति । स्पर्शवद्द्रव्येति । तस्य व्यापकमिति ।
पक्षातिरिक्तेतरस्य व्यापकतया गृहीतमित्यर्थः । ननु मन्वत्र विशेषे वद्समवेतत्वस्योपाधित्वे न हानिः नापत्तिः पक्षातिरिक्तेत्युद्-
साध्यव्यापकताग्रहानन्तरं भवान् पक्षे साध्याव्यापकत्वग्रहानन्तरं भवान् । यदि वा व्यवधानेन व्यापकत्वं गृह्येत विपरीतबाधकतर्केण कस्यचि-
न्निरवयवस्य स्पर्शवतः सिद्धौ तस्य समवेते न द्रव्ये साध्याव्यापकत्वग्रहानन्तरं तथा तदा समभावित्वात् । किंच प्रकृते नित्यद्रव्यसमवेतत्वस्य ष्टम

क्षधर्मतावच्छेदकमेवत्वमवच्छिन्नाभावमात्रगतेनानित्यत्वव्यवसमवेतत्वाभावेत्वे नसाध्यतावच्छेदकेन च नानैकान्त्यादिसत्त्व इत्याश
यः किंचेति। पक्षधर्मतावच्छेदक इति। पक्षधर्मतावच्छेदकाभावपाः साध्यव्यापकः सिद्धोपि सर्व्वः। निष्कलङ्कमुपाधिरिति। निष्कलङ्कमुपाधित्वे
नह्यानित्यत्वर्थः। कस्य व्यापक इति। कस्य व्यापकत्वेन ग्रहीतव्य इत्यर्थः। तज्ज्ञानं विना न व्यापकत्वग्रहोपयोग इति भावः। ननु प्रकृ
तानुमानेन तद्ग्रहीत्वोपाधौ यदि तद्व्यापकत्वग्रहस्तदैवासिद्धव्यसिद्धिव्याघातः। किं त्वनुमानान्तरप्रमाणान्तरेण वा तद्ग्रहीत्वोपा
धौ तद्व्यापकत्वग्रहः स्यादित्यत आह नहीति। न वै सर्वः स्वोपाधौ सोपाधित्वेन ज्ञातो पक्षव्यापक इति। तथा च सोपाधौ साध्यस्य पक्ष
धर्मतावच्छेदकत्वमेवासिद्धमिति भावः। इदमुपलक्षणं वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यादावुद्भूतरूपादावव्याप्तिः। नहि
तत्र वहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वादिकं पक्षधर्मतावच्छेदकम्। न च यत्र कदाचिद् यस्य कस्य चित् पक्षधर्मतावच्छेदकत्वं तत्त्वावच्छे
तत्र वहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वादिकं पक्षधर्मतावच्छेदकम्। न च यत्र कदाचिद्यस्य कस्य चित्पक्षधर्मतावच्छेदकत्वं तत्र
दके योग्यतारूपाद्यव्यापिना व्याप्तिः। विशिष्टलाघवतानादिसहकारेण वहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वेऽपि कदाचित्पक्षधर्मतावच्छे
द्यत्वादिति वाच्यम्। प्रसिद्धानुमाने महानसत्वादेरप्युपाधितापत्तेः। महानसीयवह्न्यादेरपि कदाचित्पक्षधर्मतावच्छेद्यत्वेन तद्व्या
पकत्वादित्याशङ्क्य विसर्गः॥ इत्युपाधिलक्षणं पूर्वपक्षरहस्यम्। प्रथमतो लक्षणतानिरूपाकरूपहेतावच्छेदकं निर्वक्ति। यदिति। अस्थल
हृते स्वरूपत्वेलक्षणं तत्विलक्षणं ग्रन्थापसंगतेः। पक्षेतिचादित्वेनेत्यन्तमसहार्थेऽतो वा। अन्यपदार्थस्य साध्यव्यभिचारित्वेन सा
धनस्य सा धने समानार्थे षष्ठी विधानात्। साध्यव्यभिचारित्वमिति। वर्त्तत इति शेषः। तथा च पक्षव्यभिचारित्वविशिष्टं साध्यव्यभिचारि
त्वं साधनवृत्तिरुपाधिरिति पर्याप्तोऽर्थः। वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात्त्वमेव पत्वात्सहोऽविशिष्टसाध्यव्यापकोपाधीनामु
तरूपादीनां व्यभिचारित्वेन विशिष्टसाध्यव्यभिचारित्वमविसाधनवृत्तिमवत्येवेति न तत्राव्याप्तिः। वह्निमान्धूमादित्यं पर्वतीत्वादि सादि

मू.टी.

सद्धेतौ साध्यव्यापके वह्निसामग्रीत्वगुणवत्त्वादावतिव्याप्तिवारणाय साधनवृत्तित्वप्रवेशः। साधनपदं च साधनतावच्छेदकावच्छि
न्नपरं। तेन द्रव्यं विशिष्टसत्त्वादित्यादौ विशिष्टसत्तानतिरिक्तत्वेपि न गुणवत्त्वादावतिव्याप्तिः। धूमवान्मादित्यादौ द्रव्यं पृथिवीत्वा
दित्यादौ च सद्धेतौ साध्यव्याप्यस्य महानसत्वघटत्वादेर्वारणाय साध्यव्यभिचारित्वनिवेशः। पक्षसामानाधिकरण्यविशिष्टं साध्य
५ व्यभिचारित्वविशिष्टसाध्यव्यभिचारित्वं चभिमुक्तौ धूमवान्वह्नेः रूपवान्द्रव्यत्वादित्यादौ साधनव्यापके वह्निसामग्रीत्वद्रव्यत्वा
दावतिव्याप्तिरेतावद्व्यभिचारित्वविशिष्टमिति। पक्षव्यभिचारित्वं साध्यव्यभिचारित्वं च साधनतावच्छेदकावच्छिन्नाधिकरणवृत्ती
मुक्तौ पर्वतो धूमवान्वह्नेरित्यादौ पर्वतेतरत्वमहानसेतरत्वादेरिदं गुरुरूपादित्यादौ पृथिवीत्वाभावघटत्वाभावादेश्चो
पाधितापत्तिरतो विशिष्टत्वप्रवेशः। तेषां व्यभिचारित्वविशिष्टसाध्यव्यभिचारित्वं च न नकुत्रापि हेतुव्यक्तौ तदधिकरणताव
क्तौ वेति तत्पुरुषः। कृत्स्नतन्त्रघालिकतनद्वह्नित्वतत्तद्रूपत्वावच्छिन्नाधिकरणतायै वह्नित्वरूपत्वाद्यवच्छिन्नाधिकरणताव्यु
त्युपपत्तौ सकलवह्न्यधिकरणरूपाधिकरणसाधारणातिरिक्तैकतद्वह्न्यवच्छिन्नाधिकरणत्वकल्पने गौरवान्माननाभावाच्च अत एव
रूपवान्द्रव्यत्वादित्यादौ द्रव्यसत्त्वादित्यादौ च पृथिवीत्वाभावघटत्वाभावादेर्नातिव्याप्तिः हेतौ पृथिवीत्वाभावादेर्व्यभिचारित्वविशिष्ट
साध्यव्यभिचारित्वसत्त्वेपि कुत्रापि हेत्वधिकरणताव्यक्तौ तद्विशिष्टसाध्यव्यभिचारित्वविरहात् अत एव रूपकृत्स्नपृथिवीत्वजलत्वादिवि
शिष्टद्रव्यत्वसत्तात्वावच्छिन्नाधिकरणतयैव द्रव्यत्वसत्तात्वावच्छिन्नाधिकरणताव्युत्पत्तौ पृथिव्यादिनवसाधारणकालाति
रिक्तैकद्रव्यत्वत्वावच्छिन्नाधिकरणतायां गुणादित्रयसाधारणातिरिक्तैकसत्तात्वावच्छिन्नाधिकरणतायाश्च कल्पने गौरवान्माननाभा राम
वाच्च द्रव्यत्वाधिकरणत्वेन पृथिवीत्वाभावाद्यवृत्तावपि प्रसत्त्वद्रव्यत्वत्वावच्छिन्नाधिकरणत्वेन पृथिवीवृत्तित्वेपि प्रत्यक्षस्यापि पर्याप्तिविदधिकरण

ताव्याप्तिमाहात्म्यप्रमात्वस्येष्टत्वात् अन्यथा तादृशाधिकरणताव्यक्तीनां द्रव्यत्वत्वानवच्छिन्नत्वे पृथिवीवृत्तिद्रव्यत्वाधिकरणत्वं न द्रव्य-
त्वत्वावच्छिन्नाभिन्निरूपितेऽपि पर्वतं चिदधिकरणताव्याप्तिमाहात्म्यप्रमात्वापत्तेः असकृद्वाच्यवच्छेदकतावत्त्वं घनैकाधिकरणवृत्ति-
त्वरूपवैशिष्ट्यमेव नतीपाधेः तथा च वह्नित्वरूपत्वद्रव्यत्वत्वाद्यवच्छिन्नाधिकरणत्वस्य सकलतद्वदवच्छिन्नाधिकरणनिरू-
पितत्वेऽपि न क्षतिः पर्वतेतरत्वादिव्यभिचारित्वस्य साध्यव्यभिचारित्वेन तादृशवैशिष्ट्यस्याप्रसिद्धत्वादेवातिव्याप्तिविरहात्
इत्थं च पक्षधर्मावच्छिन्नव्यभिचारित्वविशिष्टसाध्यव्यभिचारित्वाधिकरणं साधनतावच्छेदकावच्छिन्नसाधनाधिकरणत्वं साध्यसमा-
नाधिकरणवृत्तितद्धर्मवत्त्वमुपाधित्वमिति निष्कर्षः। तेन धूमवान् वह्नेरित्यादावार्द्रेन्धनं न द्रव्यत्वादिरूपेणोपाधिः। धूमवान् वह्ने-
रित्यादौ विरूढत्वं न त्वादिरूपाधितावारणाय पक्षसत्त्वं न तत्र मे विशेषणं। साध्याधिकरणनिष्ठाधारतानिरूपिताधेयतावच्छेदक-
त्वं तद्विधेः। तेन द्रव्यप्रमेयत्वादिना द्रव्यान्यत्वविशिष्टं सत्त्वं द्रव्यं सत्त्वादिमत्त्वं द्रव्यमेतद्विशिष्टगुणभेदश्च नोपाधिः। पक्षधर्मावच्छि-
न्नव्यभिचारित्वं च पक्षधर्मावच्छिन्नवद्वृत्तित्वे पक्षधर्मावच्छिन्नाभावीयप्रतियोगितावच्छिन्नाधिकरणतावद्वृत्तित्वं वा तेन गन्धवान् द्रव्य-
त्वादित्यादौ साधनव्यापके संयोगादौ नातिप्रसङ्गः। द्रव्यत्वाभाववान् नरस्त्वादित्यत्र स्वाभाववद्वृत्तित्वरूपस्वव्यभिचारित्वे न द्रव्ये
साध्यव्यभिचारात् मानस्मप्रर्यापि संयोगाभावादिनैसंग्राह्यः वक्ष्यमाणलक्षणेनाकाशत्वादौ नातिव्याप्तिः न ततो व्याप्तिः नच धूमवान् वह्नेरि-
त्यादौ साध्यव्याप्यमहानसत्वादावतिव्याप्तिः। तद्व्यभिचारित्वविशिष्टसाध्यव्यभिचारित्वस्यापि हेत्वधिकरणतावृत्तित्वादिति भा-
वः। तेन तस्य लक्षणत्वात् महानसापेक्षोऽस्मात्कालीनत्वावच्छिन्नधूमव्यापकत्वेऽपि तद्वच्छिन्नवह्निव्यापकत्वेन वक्ष्यमाणलक्षणा-
क्रान्तत्वात्। सर्वे साध्यसमानाधिकरणाः सद्धेतवः। हेतोरेकाश्रये येन व्यभिचारितेति सिद्धान्तलक्षणं व्यभिचारिता साध्यव्यभिचारिता

प्र॰टी॰ 5

चैकाश्रये यस्मिन्नधिकरणे हेतावित्यनेन तद्गताधारार्थः। एकस्मिन्नधिकरणे इत्युपादानात् पर्वतो धूमवान्वह्नेरित्यादौ पर्व-
तेतरत्वमहानसेतरत्वादेरिदं गुरुरूपादित्यादौ पृथिवीत्वाभावघटत्वाभावादेश्च न संग्रहः। न च तेषामपि संग्राह्यत्वम-
स्त्विति वाच्यं। व्याप्तिपक्षधर्मतयोरेकतरभंगस्यावश्यकतया तेष्वव्यभिचारित्वेन विशेषितेन साध्यव्यभिचारानुमानासं-
भवात् रूपवान्द्रव्यत्वादित्यादौ अपि पृथिवीत्वाभावघटत्वाभावादिर्न संग्राह्यः। जलसमवेतत्वादिविशेषितेन त-
द्व्यभिचारित्वेन तत्र साध्यव्यभिचारानुमानसंभवेपि तद्व्यभिचारित्वसाध्याव्यभिचारित्वयोरेकस्मिन्नधिकरणे हेतोरव-
संभवात् तत्र तदनुपाधित्वस्योपाध्यादिसकलतान्त्रिकसम्मतत्वाद्युक्तिसिद्धं च गुरुरत्नके चिन्तु हेतोरेकाश्रये हेतुरूपे एक-
स्मिन्नधिकरणे एकस्यां हेतुव्यक्तौ विवक्षितायां तेन रूपवान्द्रव्यत्वादित्यादौ पृथिवीत्वाभावघटत्वाभावादेरपि सं-
ग्राह्यः। इदं गुरुरूपादित्यादौ गुरुत्वसंग्राह्यः। एकस्या एव वह्निव्यक्तेरयोगोलकपर्वतादावुभयवृत्तित्वसंभवे धूमवान्वह्नेरित्या-
दौ पर्वतेतरत्वमहानसेतरत्वादेरपि संग्रहः। न च तत्र तत्रैतेषां संग्राह्यत्वे वक्ष्यमाणलक्षणस्यातिव्याप्तिरिति वाच्यं। तल्लक्ष-
णस्यापि तत्साधारणतया अग्रे व्याख्यास्यमानत्वात्। न च तत्र संग्राह्यत्वे आधेयव्यक्तेरैकत्वेप्युत्पत्युत्पन्नयोः अधिकरणव्यक्ति-
भेदेनाधिकरणताया भेदात् महानसत्वावच्छिन्नाधिकरणताव्याप्त्याः पर्वतादिरूपस्य नाधिकरणत्वावच्छिन्नस्याप्युक्तविशेषेण
सकलरूपाधिकरणसाधारणस्यैकस्य पृथक्त्वात् इदं गुरुरूपादित्यादौ पृथिवीत्वाभावादौ वातिव्याप्तिः। तत्र तादृशस्य तदा-
सर्वसंमतत्वादिति वाच्यं। पक्षाव्यभिचारित्वे न पक्षव्यापकताकत्वे न पक्षसाधनतायसाधनतावच्छेदकावच्छिन्नेन साध्यव्यभि-
चारित्वं तस्य नियतव्यापकताकत्वं वक्तुं तु उपाधिरित्यर्थः। तथा च साधनतावच्छेदकावच्छिन्नाय साधनस्य तस्य व्यापकतानवच्छेद- राम

च्छं साध्यतावच्छेदकं साधनतावच्छेदकावच्छिन्नसाधनव्यापकतावच्छेदको यो धर्मः साध्यसमानाधिकरणवृत्ति तद्धर्मव
त्त्वमुपाधित्वमिति फलितमिति न क्वापि दोष इत्याहुः। न हि समानरूपवान्द्रव्यत्वादित्यादौ पृथिवीत्वाभावादेरनुपाधित्वस्योपाध्याभा
दिसकलतान्त्रिकसम्मतत्वात्तन्न। तद्धर्मावच्छिन्नवद्द्रव्यत्वेन विशिष्टे साधनाधिकरणे साध्यवद्वृत्तित्वं वर्त्तते तद्धर्मावच्छि
न्नत्वमुपाधित्वमित्येव लक्षणं स्यात् नावच्छेदकलाघवात् तथा च द्रव्यत्वत्वावच्छिन्नाधिकरणत्वस्य साधनाधिकरणसाध्याभावाधिकरणस्य
कत्वमते पि रूपवान्द्रव्यत्वादित्यादौ पृथिवीत्वाभावादौ नातिव्याप्तिः। न वा रूपत्वावच्छिन्नाधिकरणतापर्याप्त्येकत्वविशिष्टगुरु
रूपादित्यादौ तत्र तत्राव्याप्तिश्च। इत्थं च पक्षव्यभिचारित्वेन पद्धर्मावच्छिन्नवद्द्रव्यत्वेन तत्पाचसहार्थे साधनस्यैव तन्न समाधि
करणस्य विशेषः। साध्यव्यभिचारित्वं साध्यव्यभिचारकत्वं सउपाधिः तद्धर्मावच्छिन्नत्वमुपाधिरित्यर्थः। विरुद्धसाध्यसमानाधि
करणवृत्तित्वेन बलस्य तावच्छेदकधर्मविशेषणीयः। तेन न साध्यविरुद्धधर्मे ऽतिव्याप्तिरिति। लक्ष्यतावच्छेदकं परिष्कुर्वन्नि
तद्व्यक उद्दूरत्वादिति समासः। उक्तलक्ष्यतावच्छेदकस्य व लक्षणसमन्वयेपि येन रूपेण हातव्योपाधेर्द्वयकत्वं तादृशं लक्ष
णमाह। लक्षणं त्वित्यादिना व्यवसितपदार्थमाह। यद्धर्मेति। यद्धर्मावच्छेदेन यद्धर्मवत्ति साध्यं प्रसिद्धं साध्यं वर्त्तमानं तद्व
च्छिन्नत्वे सामानाधिकरण्यस्य संबन्धेन तादृशपङ्क्तिचिह्नमविशिष्टमित्यर्थः। यथा अत्र तेन तच्छेदकत्वेनान्यत्र वृत्तित्वेऽप्यनुपातान
तिरिक्तवृत्तित्वं वा मित्रातनयत्वादौ शाकपाकजत्वस्य स्वरूपसंबन्धविशेषः। मित्रातनयत्वादौ तथात्वे मानाभावादिमसंग
तत्वापत्तेः। अत्र नव्याधिकरणपङ्क्तिचिह्नमविशिष्टसाध्यस्य पर्यवसितपदार्थत्वेः प्रसिद्ध्यापत्तिरतो धर्मविशेषपरिचयाय प्रसिद्धं

मू॰टी॰ तेन तुल्यलक्षणघटकं । लक्षणं तु सामानाधिकरण्यसंबंधेन यत्किंचिद्धर्मविशिष्टस्य साध्यव्यापकत्वे सति साधनाव्यापकत्वमेव ।
6 केचित्तु । प्रसिद्धनिष्ठं तदेतच्च पर्यवसितं न यद्यपि तथापि स्वरूपकथनमिति वदंति । कश्चित्साधनमेवेत्येकः कः स्यात् सोपि मित्रातन
यत्वादित्यादौ विलक्षणः । कश्चिद्द्रव्यत्वादौ इति । वायुर्बहिरिंद्रियप्रत्यक्षः प्रमेयत्वादित्यादौ विलक्षणः । कश्चिन्महानसत्वादौ इति धू
मवान्वह्नेरित्यादौ विलक्षणः । न च तत्रार्द्रेधनादेः स्वत्वसाध्यव्यापकस्यैव संभवात्तद्भिन्नसाध्यव्यापकत्वे कुतोऽनुपेयमिति
वाच्यं । अर्द्रसाध्यव्यापकत्वेपि विशिष्टसाध्यव्यापकत्वानपायात् परंतु व्यर्थविशेषणतया विशिष्टस्याव्यवच्छेदकमेव
गुनवे सन्देहात् । ननु सामानाधिकरण्यसंबंधेन यत्किंचिद्धर्मविशिष्टस्य साध्यव्यापकत्वे सति साधनाव्यापकत्वस्य लक्षणे
त्ववान्धूमादित्यादावपि सपक्षैकदेशवृत्तिधर्मस्य व्यंजनवत्त्वादेरुपाधितापसंगः । महानसत्वाद्यवच्छिन्नवह्न्यादिव्यापकत्वा
दिति चेन्न । अत्रोपाध्यायाः । यद्धर्मविशिष्टसाध्यव्यापकत्वं तद्धर्मविशिष्टसाधनाव्यापकत्वस्य विवक्षितत्वात् । तेन चैवं कश्चि
न्महानसत्वादीति मूलमसंगतं । तद्धि विशिष्टसाध्यव्यापकस्यार्द्रेधनादावभावादिसाध्ये विलक्षणः । कश्चिद्द्रव्यत्वादौ इति वाच्यं ।
धूमानधिकरणवह्न्यधिकरणस्यापि महानसस्य सत्त्वात् ।। इत्याहुः । विशिष्टत्वे च सामानाधिकरण्यसंबंधेन । तेन रूपवान्पृथिवी
त्वादित्यादौ न दृष्टोऽसमिकालीनत्वविशिष्टरूपव्यापकस्य च घटेतादृशविशिष्टस्यापि वीतान्यापकस्य तद्घटान्यत्वस्य नोपाधित्वप्र
संगः । साध्यपदं च साध्यतावच्छेदकविशिष्टपरं । तेन गुणकर्मान्यत्वविशिष्टसत्तावान् प्रमेयत्वादित्यादौ द्रव्यकर्मान्यत्वविशिष्टस राम
त्ताव्यापकेऽतादृशप्रमेयत्वाव्यापके च गुणत्वादौ नातिव्याप्तिः । साधनपदमपि साधनतावच्छेदकविशिष्टपरं । तेन द्रव्यं गुणान्यत्व

विशिष्टसत्त्वादिसाध्यके द्रव्यत्वव्यापके द्रव्यगुणान्यतरत्वविशिष्टसत्ताव्यापके पृथुत्वसत्तापि अव्यापके च गुणान्यत्वेनातिव्याप्तिः। पृ
थ्वीगुरुरूपादिसाध्यके पृथिवीत्वाभावादिरिव रूपवान् द्रव्यत्वान्महाकालान्योन्यघटत्वादित्यादावपि पृथिवीत्वाभावत्वेनोक्तलक्षणे हादिने
लक्षणस्य इति न तत्राव्याप्तिरिति भावः। रूपवान् द्रव्यत्वादित्यादौ पृथिवीत्वाभावादेर्लक्षणत्वे तु पक्षधर्मावच्छेदे इति सप्तमी पञ्चमे विशिष्टविशि
ष्टे तात्पर्यः। साधनाधिकरण इति शेषः। नशाद्दृष्टनिषेधार्थकः प्रसिद्धवर्तमानं। तथा च साध्यानधिकरणसाधनाधिकरणवृत्तिध
र्मावच्छिन्नसाध्यव्यापकतावच्छेदकत्वे सति साधनाव्यापकतावच्छेदको यो धर्मस्तद्वत्वमुपाधित्वमिति फलितं। विशिष्टसाध्य
व्यापकोपाधावव्याप्तिवारणाय अवच्छिन्नान्तं साध्यविशेषणं। रूपवान् द्रव्यत्वादित्यादौ साध्यानधिकरणसाधनाधिकरणवाय्वादि
नद्वृत्तिधर्मो वायुजलान्यतरत्वादि तदवच्छिन्नसाध्यव्यापक एव पृथिवीत्वाभावादिरिति न तत्रापि लक्षणसमन्वयः। फलितं विशि
ष्टावच्छिन्नसाध्यव्यापकत्वस्य साधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वस्य वा अभिधाने वह्निमान् धूमादित्यादि सद्धे
तावपि साध्यव्याप्यमहानसत्वं जननवत्वादेरुपाधितापत्तिरतः साध्यानधिकरणसाधनाधिकरणवृत्तित्वं धर्मविशेषणं।
साध्यानधिकरणसाधनाधिकरणे च सद्धेतावप्रसिद्धमतो न दोषः तादृशवत्वं। महानसत्वं जननवत्वादेरपि महानसजलान्य
तरत्वविशिष्टसाध्यव्यापकतया होषतादृशस्य वारणाय साधनाधिकरणत्वप्रवेशः। साधनाधिकरणत्वं च साध्यतावच्छेदकावि
शिष्टाधिकरणसाधनतावच्छेदकविशिष्टाधिकरणप्रसिद्धेः। साध्यानधिकरणत्वमपि साध्यतावच्छेदकविशिष्टानधिकरणत्वेन
न गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्र साध्यानधिकरणजात्यधिकरणप्रसिद्धावपि द्रव्यत्वादौ नाव्याप्तिः। न चैवमुपाधि

मू.टी.

7

णोरेवं साध्यव्यभिचारमानादुपाधिव्यभिचारेणापुनर्व्यभिचारानुमानमफलं स्यादिति वाच्यं। हेतुविशेष्यकसाध्यव्यभिचारप्रकारक
ज्ञानार्थं न हि अनुमानस्यावश्यकत्वात्. तादृशज्ञानस्यैव प्रतिबंधकत्वात्. उपजीव्योपाधित्वं ज्ञाता तास्तूर्द्वं साधनाधिकरणस्य न साध्यानधिक
रणत्वज्ञानं तत्र निष्क्रियतोपाधितां भावस्योपजीव्यत्वात्. साध्यव्यापकत्वमपि साध्यतावच्छेदकविशिष्टसाध्यव्यापकत्वं बोध्यम्। अ
न्यथा गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्र द्रव्यत्वादावव्याप्त्यापत्तेः। तत्र द्रव्यगुणान्यतरत्वादिरूपतादृशधर्मावच्छि
न्नविशिष्टसत्ताव्यापकत्वसत्त्वेपि तादृशशुद्धसत्ताव्यापकत्वविरहात्। न च तन्निरूपकसाध्यानधिकरणनिरूपकसाधनाधिकरणवृ
त्तिधर्मावच्छिन्नतिरूपकसाध्यसमानाधिकरणवृत्तित्वे सति त्वेवास्तु। किं व्यापकतावच्छेदकपर्यन्तानुधावनेन तादृशसाध्यसमाना
धिकरणवृत्तित्वं च तादृशसाध्याधिकरणनिरूपिताधेयतावच्छेदकत्वं तेन द्रव्यं सत्त्वादित्यत्र द्रव्यान्यत्वविशिष्टसत्त्वेनाति
व्याप्तिरिति वाच्यं। व्यापकताप्रवेशे उपाधिशरीरे मानस्योपाधिव्यभिचारित्वनिष्ठसाध्यव्यभिचारित्वव्याप्तिग्रहोपयोगित्वास
म्भवात्। पक्षधर्मत्वनिवेशे च वैयर्थ्याभावात्। धूमवान् वह्नेरित्यादौ साधनव्यापकस्य प्रमेयत्वादेर्वारणाय साधनाव्यापकताव
च्छेदकत्वप्रवेशः। साधनपदं च साधनतावच्छेदकावच्छिन्नपरं। तेन द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यत्र द्रव्यकर्मान्यतर
त्वादिरूपतादृशधर्मावच्छिन्नसाध्यव्यापके गुणान्यत्वे नातिव्याप्तिः। न चैवमपि द्रव्यं गुरुरूपादिमत्त्वादित्यादौ जलतेजोन्यतरत्वादिरूपता
दृशधर्मविशिष्टसाध्यव्यापकतया पृथिवीवृत्तिरूपाव्यापकतया च पृथिवीत्वाभावादेरुपाधितापत्तिः। पृथिवीत्वाभावस्य
भिचारित्वानिरूपकत्वात्। पृथिवीमात्रवृत्तितया साध्यव्यभिचारित्वाभावात्। तत्र तादृगनुपाधित्वस्य सर्वसम्मतत्वादिति वाच्यं। पू राम
र्वदलप्रविष्टपद्यासाधनव्याप्तिः साधनतावच्छेदकविशिष्टसाधनव्यापकत्वस्य विवक्षितत्वात् द्रव्यत्वाभाववान् सत्त्वादित्यत्र स्व

भावद्वत्तित्वरूपस्य व्यभिचारित्वेन साध्यव्यभिचारानुमानसमर्थो विपर्ययो गगनाभावादिर्न संग्राह्यः। तेनोपाध्यायमतेऽत्र मते च
मतेऽत्र व्याप्तिरिति समासः॥ प्रसंगादिह दृष्टान्ते उपाधिव्यभिचारेण साध्यव्यभिचारानुमितिप्रकारं व्युत्पादयति। तथा हीत्यादि
ना। समव्याप्तस्य साध्यव्यापकस्य · विषमव्याप्तस्य · साध्याव्यापकस्य यथा अग्नेः अन्ये साध्यव्यापकस्यैतस्यैव पर्याप्तेः सा
ध्यव्यभिचारः साध्यव्यभिचारस्य ग्रहः स्फुट एव स्फुटत्वं संभवत्वे व्यभिचारित्वेन व्यभिचारित्वेनापि साधनस्य साध्यव्य
भिचारित्वमेव साधनस्य साध्यव्यभिचारित्वग्रहः संभवत्येव · ननु विशिष्टसाध्याव्यापकव्यभिचारित्वेन तद्विशिष्टसाध्यव्यभि
चारित्वग्रह एव संभवति न तु शुद्धसाध्यव्यभिचारस्य ग्रहः स्यात् अत आह · विशेषणेति विशेष्येति॥ विशेष्यव्यभिचारि तद्रूपतानि
यमादि सर्वं॥ ननु विशिष्टाभावविशेष्याभावयोर्भेदेन व्यभिचारभेदात्कथं विशिष्टव्यभिचारो विशेष्यव्यभिचारात्मेति चेन्न।
विशिष्टाभावो विशेष्यविशिष्टविशेषणाभावो यस्मान्नातिरिच्यत इत्यभिप्रायात् विशिष्टाभावस्यापि रि कस्ये स्वविशिष्टाभा
वाधिकरणेऽस्य विशिष्टाभावाधिकरणेऽति यमे न विशेष्याभावाधिकरणवृत्तित्वस्य विशिष्टाभावाधिकरणवृत्तित्वरूपत्वाद्
अत एवेति। यतो विशेषणव्यभिचारितिसाधने विशिष्टसाध्यव्यभिचारो विशेष्यभिन्नमपि शुद्धसाध्यव्यभिचारस्वरूपेण
त एवेत्यर्थः॥ नार्थान्तरमिति। वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यादौ उद्भूतरूपवत्त्वव्यभिचारित्वेन विशिष्टसाध्यव्यभिचा
रसाधने नार्थान्तरमित्यर्थः। विशेषणतोऽपि। पक्षधर्मत्वादिः पक्षधर्मतावलादिति। विशेषणव्यभिचारित्वरूपविशिष्टसाध्यव्यभि
चारित्वग्रहस्य बाधग्रहसहकारादित्यर्थः। विशेषणव्यभिचारित्वसाधने विशिष्टसाध्यव्यभिचारस्य विशेष्येऽपि भूतत्वशुद्धसा
ध्यव्यभिचारस्वरूपत्वे न विशेष्येऽपि भूतत्वशुद्धसाध्यव्यभिचारस्य विषयापकतावच्छेदकावच्छिन्नत्वादिति भावः। न च तस्य व्यापक

मू.टी.
8

तावच्छेदकावच्छिन्नत्वेप्यनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमाद्विशिष्टसाध्यव्यभिचारत्वप्रकारिकैवधीः स्यात्तत्पाद
र्वीतरमेव भ्रुदुष्टसाध्यव्यभिचारत्वप्रकारकंदुष्टेवकारत्तिमत्तव्याप्तिज्ञानप्रतिबंधकत्वेनोद्देश्यत्वादितिवाच्यं दृतरकोटि
वाधग्रहसहकारेणव्याप्यकतानवच्छेदकरूपेणापि व्यापकतावच्छेदकावच्छिन्नानुमितिस्वीकारात्तत्र्यत्पाविशेष्यव्यभिचा
रित्वाविषयकत्वे. अपर्यवसानात्. अपर्यवसानप्रसंगात्। अप्रमाणत्वप्रसंगादित्यावत्. विशेषणव्यभिचारित्वस्य
चवाधितत्वादित्याभावः। ननु तथाप्यनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेपक्षधर्मतावलाद्विशिष्टसाध्यव्यभिचारत्व
प्रकारिकाधीर्न संभवतीत्यस्वरसादाह. यद्वेति। द्रव्यप्रत्यक्षत्वेति। द्रव्यत्वावच्छिन्नप्रत्यक्षत्वे इत्यर्थः। महत्त्ववत्ताच हेतुरादिनिष्ठम
हत्त्ववत्तातेन घटादिनिष्ठमहत्त्वस्य साध्यसाधनविकलत्वेपि नक्षतिः। इदं चानुमाने प्रत्यक्षपरिमाणवत्त्वादेरुपाध्यभिप्राये
ण न तु दृष्टान्तरूपवत्त्वोपाध्यभिप्रायेण तस्यात्मनि व्यभिचारेण द्रव्यत्वावच्छिन्नप्रत्यक्षत्वाव्यापकत्वात् तदव्यभिचारित्वस्य
सुखादौ प्रत्यक्षत्वव्यभिचारित्वव्यभिचाराद्वेतिद्रष्टव्यं। न च द्रव्यप्रत्यक्षत्वव्यापकेत्यत्र द्रव्यपदवैयर्थ्यमितिवाच्यं प्रत्यक्षपरि
माणवत्त्वादिव्यभिचारित्वस्यैव हेतुत्वात्. द्रव्यप्रत्यक्षत्वव्यापकत्वोपन्यासस्तु तर्कप्रदर्शनायेति। श्यामभिन्नात्मनपक्षत्वेति। भिन्नात्मन
पत्वावच्छिन्नपक्षतात्वे इत्यर्थः। अत्रापि शाकपाकजत्वव्यभिचारित्वादित्येव हेतुः। व्यापकत्वोपन्यासस्तु तर्कप्रदर्शनायेति ध्येयं॥ अत्र
घटत्वव्यापके इत्यत्र द्रव्यपदवैयर्थ्यमितिवाच्यं। प्रत्यक्षपरिमाणवत्त्वादिव्यभिचारित्वस्यैव हेतुत्वात् द्रव्यप्रत्यक्षत्वव्यापकत्वोपन्यास
स्तु तर्कप्रदर्शनायेति। श्यामभिन्नात्मनपक्षत्वेति। भिन्नात्मनपक्षत्वावच्छिन्नपक्षतात्वे इत्यर्थः। अत्रापि शाकपाकजत्वव्यभिचारित्वादित्येव हेतुः। तत्र
व्यापकत्वोपन्यासस्तु तर्कप्रदर्शनायेति। श्यामभिन्नात्मनपक्षत्वेति। भिन्नात्मनपक्षतावच्छिन्नध्येयं। अत्र घटत्ववादिति। तन्त्वघटत्वे घटभेदः

सचनान्वयेन दृष्टान्तः तथैव च विशेषणाभावे न साधनविकलत्वात् नापि व्यतिरेकेण साध्यस्य नञ्समत्वादि इति चेत् अत्रास्मत्पितृचर-
णाः । यथा हि धूमविशिष्टप्रमेयत्वं व्यभिचारि तथा मित्रातनयत्वादिविशिष्टस्य दृष्टत्वमपि मित्रातनयत्वाव्यभिचारि व-
ति भावः । ननु मित्रातनयत्वाव्यभिचारित्वं मित्रातनयत्वाभाववद्वृत्तित्वात् मित्रातनयत्वविशिष्टे घटत्वेऽपि नास्ति विशि-
ष्टस्यानतिरिक्ततया गुणघटत्वविशिष्टसत्तायां गुणादिवृत्तित्ववत् मित्रातनयत्वविशिष्टघटत्वस्यापि मित्रातनयाभिन्ने-
त्यादावभाववद्वृत्तित्वरूपव्यभिचारित्वमपि न धर्मविशिष्टप्रमेयत्वे तथा च साधनविकलो दृष्टान्तः तस्मात् व्यापकत्वे-
रूपव्यभिचारं निर्वक्ति अव्यभिचारस्येति । तस्य मानाधिकरण्येति । तत्र मित्रातनयत्वसमानाधिकरणात्यन्ताभावाप्रतियोगि-
पक्षे इति वदन्तो हि । स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वे मित्रातनयत्वकत्वमित्यर्थः । यथा श्यामे मित्रातनयत्वव्याप-
कत्वस्येव फलतो मित्रातनयत्वाव्यभिचारित्वस्य तथा शाकपाकजत्वव्यभिचारित्वरूपविशेषणदलस्य वैयर्थ्यापत्तिः । न च वा-
भिन्नधर्मिकत्वान्न वैयर्थ्यमिति वाच्यं । तथा विशाकपाकजत्वव्यभिचारित्वस्य शाकपाकजत्वाभाववद्वृत्तित्ववर्तमानत्वरूपतया
शाकपाकजत्वाभाववद्देशवैयर्थ्यापत्तेरुक्तरीत्या तन्मित्रातनयत्वव्यापकत्वे सतिवर्तमानत्वादि स्यैव सम्यक्त्वात् । अत्र भेदे
वीति । विशिष्टस्य केवलादनतिरिक्तत्वेऽपीत्यर्थः । विशिष्टस्यानतिरिक्तत्वेऽपि तन्निरूपिताधारतायां मित्रातनयभिन्नेऽभावादि-
ति भावः । एवं च पूर्वं मित्रातनयत्वप्रकारकप्रमाविशेष्यताश्रये व्यभिचारः । तस्यापि मित्रातनयत्वादिविशिष्टे [illegible] मित्रा-
तनयत्वाव्यभिचारित्वरूपतया शाकपाकजत्वव्यभिचारित्वरूपविशेषणदलस्य वैयर्थ्यापत्तिः । न च भिन्नधर्मिकत्वान्न
वैयर्थ्यमिति वाच्यं । तथा विशाकपाकजत्वव्यभिचारित्वस्य शाकपाकजत्वाभाववति वर्तमान [illegible] शाकपाकजत्वाभाववद्वृत्तित्वरूप

मू.टी. शाकपाकजत्वव्यभिचारित्वात् तथापि शाकपाकजत्वव्यभिचारित्वमपि स्वसमानाधिकरणयत्तदभावप्रतियोगिशाकपाकज
त्वकत्वं तथा च स्वसमानाधिकरणात्यन्ताभावाप्रतियोगि मित्रातनयत्वकत्वे सति स्वसमानाधिकरणयत्तदभावप्रतियोगिशा
कपाकजत्वकत्वादिति फलितं। स्वपदं मैत्रधर्मावच्छिन्नबोधकम् तेन कोपि दोषः इत्याहुः। न व्यासक्त। अघटत्वं व्यतिरेकेणैव
दृष्टान्तः मित्रातनयत्वस्य मित्राजन्यत्वविशिष्टपुंस्त्वाद्यावच्छेद्यविशेषरूपस्यासमवे तत्संबंधेनैवस्थापनानुमाने हेतुतया
तत्संबंधेनाप्यव्यभिचारस्यैवात्र साध्यत्वेन साध्याभावस्याप्रसिद्धत्वात्। यदि च मित्रातनयत्वं प्रकृते मित्राजन्यत्वा
वच्छेदकधर्मवत्त्वमात्रं। नाधिकं। व्यर्थत्वात्। न चापि तादृशधर्मस्य जातिविशेषरूपतया समवायसंबंधेन यत्र मत्वव्यभिचारस्यैवा
त्रसाध्यत्वेन साध्याभावस्य सुतरां तत्र सत्त्वादिति भावः। ननु मित्रातनयत्वाव्यभिचारित्वं तु मित्रातनयत्वेऽव्यभिचारस्य भेद
गर्भत्वात् तत्र तो हेतुः स्वरूपासिद्ध इत्यत आह - अव्यभिचारश्चेति। तत्समानाधिकरणेति पूर्ववदन्वयी हि। तथा च मित्रातनय
त्वाभाववदवृत्तित्वं फलितं। यथाश्रुते हेतावुक्तरीत्या विशेष्यदलघटक शाकपाकजन्यत्वाभाववदवृत्तित्वपर्याप्तिः। तच्चाभे
देऽपि भेदगर्भत्वाभावादित्याहुः। मित्राऽत्र अघटइति गौरमित्रातनयपरं तेन भेदः। तथा च गौरमित्रातनयवृत्तिधर्मोऽन्वये
नैव दृष्टान्त इत्याहुः। न च तेऽव्यभिचारश्चेत्यादिग्रंथस्य त्वयमनवद्योजनीयः। महावाप्यत्र। न च घटत्वं घटभेदः। स च न त्वन्वयेन
दृष्टान्तः साधनविकलत्वात् अधिकरणभेदनघटभेदस्य भेदाभावात्। नापि व्यतिरेकेणापि मित्रातनयत्वेन मित्राजन्यतावच्छेदक
धर्ममात्रं तस्य तनयत्वास्वरूपत्वात्। अत एव न मित्राजन्यत्वविशिष्टपुंस्त्वाद्यावच्छेद्यविशेषः। प्राचां मते तु स्वनिष्ठासंबंधस्य राम
शब्दप्रतावच्छेदकता नवच्छेदकतया तस्यापि तनयत्वास्वरूपत्वात्। अपि तु मित्राजन्यत्वविशिष्टपुंस्त्वाद्यवच्छेद्यविशेषस्य भावेन

त्वं । छिन्नलिंगं रवेड शरीरं तु नपुंसकवत्सपुत्रः तथा चास्वरूपसंबंधेनैव तत्र स्थापना नुमाने हेतुतथात्वरूपसंबंधेन रूपाभत्वव्यभि-
चारित्वस्यैवात्र साध्यत्वेनो घटत्वे साध्याभावविरहादित्याशंकायामेवाह । अव्यभिचारश्चेति । तत्समानाधिकरणेति । मित्रातन-
यत्वाधिकरणे मृतपाकेति विद्यत्ति । निष्ठत्यर्थः । तेन मित्रातनयत्वसमानाधिकरणत्वे फलितं यथा श्यामत्वे हेतौ कुमारी साध्य-
विशेषणे त्वापत्तेः तच्चेति । अभेदेपीति । घटभेदस्याधिकरणे भेदे तभेदाभावेत्यु । तन्नातीति शेषः । न चैवं श्यामत्वाद्वेव व्यभि-
चारः तस्यापि मित्रातनयत्वसमानाधिकरणत्वात् शाकपाकजत्वव्यभिचारित्वाच्चेति वाच्यं । यस्मिन्नधिकरणे मित्रातनयत्वस-
मानाधिकरणं तत्र शाकपाकजत्वव्यभिचारित्वस्य विवक्षितत्वात् मित्रातनये शाकपाकजत्वव्यभिचारित्वादिति गुरुचरणा-
दृश्यादुः । नन्वेवं साध्यव्यभिचारी उपाधिः साध्यव्यभिचारोन्नायकः स्वव्यभिचारेण साधने साध्यव्यभिचारोन्नायक इति चेत् तथात्व-
रूपसंबंधेन तद्व्यभिचारस्यैव तत्स्यापि व्यभिचारितासंबंधेन साधनवृत्तित्वात् साध्यव्यभिचारव्याप्यत्वाच्च । तथा च वह्निधूमव्यभि-
चारी आर्द्रेंधनवत्त्वादिस्तेव व्यभिचारानुमानप्रयोगः । न च व्यभिचारित्वादिरेवं धर्मः वृत्तिनियामक तथा तद्व्याप्यतावच्छेदक-
त्वं सम्भवतीति वाच्यं । वृत्तिनियामकसंबंधस्याभावप्रतियोगितावच्छेदकत्वानभ्युपगमाद्व्यापकतावच्छेदकत्वं भवेत् विव्या-
प्यतावच्छेदकत्वे बाधकाभावात् । इह हेतावुपाधिरिति प्रतीतिः साध्यव्यभिचारितासंबंधस्यापि वृत्तिनियामकत्वाच्चेति भावः । के-
रलान्वयीति वीरशैवमते नसंबंधो गवत्वादिसाहो साधनव्यापकस्यानुपस्थापी तत्स्यार्थ व्याप्याद्युपाधेर्विशेषदर्शिना साधने साध्यव्यभि-
चारानुमापकत्वासंभवादव्यभिचारित्वमनुपाधिविशेषणं । साधने व्यभिचारिपक्षे तिरहस्यस्य साधनाव्यापकत्वे तद्रूपेः । तदेव-
। विशिष्टसाध्यव्यापको पाधेरतत्वं चेत्यर्थः । सामान्यागुरुकरीत्या विशेषणाव्यभिचारित्वादिविशेषणस्य हृकारेणासाहास्यं पर

मू.टी.

10

ंपरासाधारणाव्यभिचारानुमापकत्वस्यैवहेत्वाभासतंत्रत्वादिति भावः। केचित्तु। प्रकारांतरेण लक्ष्यतावच्छेदकं निर्वक्ति। यद्धेतुकः
साधनव्यभिचारी साध्यं नातिवर्त्तते पक्ष्यभिचारः साध्यव्यभिचारो नामकः साध्यव्यभिचारानुमितिस्वरूपयोग्यः साध्यव्यभिचा
रसमानाधिकरणइति पावकस्तउपाधिरित्यर्थः। द्रव्यं पृथिवीत्वादित्यादि सद्धेतौ साध्यव्यापकस्य गुणवत्त्वादेः साध्यव्याप्यघट
त्वादेश्चोपाधितावारणाय निष्ठांतं व्यभिचारविशेषणं। तथा च साधनतावच्छेदकावच्छिन्नसाधनाधिकरणवृत्तित्वविशिष्टस्य
धर्मावच्छिन्नव्यभिचारित्वनिरूपिताधिकरणत्वे साध्यव्यभिचारसमानाधिकरणं तद्धर्मवत्त्वमुपाधित्वमिति फलितं। तेन द्र
व्यविशिष्टसत्त्वादित्यादौ विशिष्टस्याविशिष्टानतिरिक्तत्वेपि गुणवत्त्वादौ नातिव्याप्तिः। न वा आश्रयभेदेप्येकसंबंधावच्छिन्नव्यभिचा
रित्वस्यैकत्वेन द्रव्यं पृथिवीत्वादित्यादौ घटत्वादावतिव्याप्तिस्तादृशस्य पृथिवीत्वाधिकरणनिष्ठघटत्वव्यभिचारित्वस्य
समानाधिकरणत्वेपि तद्विशिष्टपृथिवीत्वाधिकरणत्वविशिष्टघटत्वव्यभिचारित्वनिरूपिताधिकरणत्वस्य पृथिवीत्वाधिकर
णत्व एव सत्त्वात्। तत्र साध्यव्यभिचारविरहात्। न चार्द्रेंधनस्य व्याप्यत्वमेव तत्स्वरूपयोग्यत्वं विवक्षितमिति वाच्यं। विशिष्टसा
ध्यव्यापकोपाध्यव्याप्यत्वापत्तेः। नत्वव्यभिचारस्य साधनाधिकरणवृत्तित्वविशिष्टत्वे साध्यव्यभिचाराव्याप्यतापत्तेः आश्रयभेदेन व्यभि
चारभेदाभावात्। एवं वह्निरूपसाध्यसामानाधिकरण्ये नापि तद्धर्मविशेषणं। तेन धूमवान् वह्नेरित्यादौ साध्यविरुद्धेजन
त्वादौ नातिव्याप्तिरुक्ता। केचित्तु आद्यं पूर्वस्मादेव। तद्वान् द्रव्यत्वादित्यादौ गुरुरूपादिसत्त्वादौ पृथिवीत्वाभावघटत्वाभावादावति
व्याप्तिवारणं तु एकैव नानात्वे चेति। व्यभिचारानुमितित्वप्रयोजकत्वं चेत्सर्वेषां माह्वातारं पदस्यावैतिमिति शुद्धसाध्यव्यापकस्य लेसामा — एम
तत्शुद्धसाध्यव्यापकस्य लेचपूर्वंपक्षगंधोक्तक्रमेण शुद्धसाध्यव्यभिचारानुमापकविशिष्टसाध्यव्यभिचारानुमितिद्वारत्वमर्थः।

नार्थान्तरमिति। ध्वंसो विनाशी जन्यत्वादित्यादौ विशिष्टसाध्यव्यापकोपाध्युद्भावने नार्थान्तरमिति तात्पर्यः। एतच्च प्रसंगात्स्व
रूपकथनेन तु लक्षणतावच्छेदकघटकतयैव तदभिधानेन अस्वरूपयोग्यतापादकत्वघटकत्वादि अभ्युपगमवादेनाह। किंचेति।
पुरुषेतरत्वादिति। उद्भावकस्य पुरुषस्य नियन्तृत्वान्न मानाभावादित्यर्थः। मात्रपदाद् दूषितलिंगकव्यभिचारानुमितिप्रतिबं
धकत्वव्यवच्छेदः। आभासोत्तरस्य। व्यभिचारानुमितिप्रकारं ... तत्र व्यभिचारानुमितिपूर्वं दृष्टान्तो। उपाधेरेवेति। तत्र ध्वं
सो विनाशी जन्यत्वादित्यादौ भावत्वादिकमुपाधिं दूषयेदेवेति योजना। तेन विपरीतपरम्परया व्यभिचारानुमितिनिर्वाहे तत्परोक्ष
ध्यसिद्धिप्रतिबंधस्य। दूषणस्य निर्वाहादिति भावः। न चैवमिति। एवं अवच्छिन्नसाध्यव्यापकत्वस्यापि दूषकतामुपयोजकत्वे अप्राव
ल्पत्वमिति। तत्र पक्षधर्मगुणत्वावच्छिन्नसाध्यव्यापकतानुत्तानसंभवादितिभावः। पृथिवीत्वमिति। पक्षधर्मरसवत्त्वावच्छि
न्नसाध्यव्यापकताहानेनसंभवादितिभावः। उपाधिःस्यादित्यतःस्यात्। तत्र शब्दजन्योऽविशिष्टव्यापकत्वादिति। पक्षधर्म
गुणत्वावच्छिन्नसाध्यव्यापकत्वेऽपि स्यादित्यर्थः। केवलान्वयित्वात्साधकमानाभावतादेतु तस्य तथा वृद्धिरपि देवो भवते
वेतिभावः। स्वव्याघातकत्वेनेति। पाधिमात्रस्य दूषकत्वव्याघातकत्वेनेत्यर्थः। पक्षेतरस्योपाधित्वे सर्वत्रैव तादृशोपाधिसंभ
वेनानुमानमात्रोच्छेदः व्यभिचारानुमानाधीनस्योपाधेर्दूषकत्वासंभवादितिभावः। आत्मेतियापत्तिः। उक्तरूपस्यासत्त्वेऽपि
द्रव्यत्वावच्छिन्नसाध्यव्यापकत्वेन ध्वावच्छिन्नसाधनाव्यापकत्वात् तत्र तासमवायित्वादितिभावः। साध्यव्यापकत्वनिश्चयादि
ति। पक्षधर्मावच्छिन्नसाधनाव्यापकत्वात् स्वधर्मावच्छिन्नसाध्याव्यापकत्वनिश्चयादित्यर्थः। पक्षाननुगतनिश्चयोऽभवति तदा बाधोन्नीत
हेतौ तदतिरिक्तनिश्चयः पक्षवृत्तिनिश्चयोऽपि भवत्येवेति भावः। सत्प्रतिपक्षकत्वात्। व्यभिचारस्याप्यापकत्वात्। अननुकूलतर्केत्येवेति।

मु. टी.

उपाध्यभाववति पक्षे साध्याभाववनिश्चयस्यैव व्यभिचारशंकाप्रतिबंधकत्वेनानुकूलतर्कत्वादिति भावः। नोपाधित्वं। नोपाधि
त्वनिश्चयः। पक्षमात्रेति। यद्यपि पर्वतावयवरूपादेरपि व्यावर्तनाय पक्षमात्रव्यावर्तकविशेषणोपात्तेन वा तद्वत्वे उपाधि
त्वानिश्चये प्रयोजकं तथापि त्वनुत्पायैक्यचारि प्रमेयोदरत्वप्रमया मूपक्षमात्रव्यावर्तकविशेषणतां पक्षेतरेतनुत्प
त्वादित्यर्थः। तथा च तत्र यथा अनुकूलतर्काभावेन तादृशोपाधेर्व्यभिचारः उन्निश्चयस्तथात्रापीति भावः। अतएवेति। व्यापकताग्रा
हकानुकूलतर्कसत्वादेवेत्यर्थः। उपाधिः। उपाधित्वेन निश्चितः। व्याप्यत्वे पक्षे मनुकूलं तर्कमाह। नतु लक्षणेति। त्याद्ये व्यनप्रभव
व धूमकर्त्तृत्वधूमोत्पत्त्यादित्यर्थः। द्वितीये तर्कमाह। अतत्पत्वेति। द्रव्यवहिरिंद्रियप्रत्यक्षे प्रति उद्भूतरूपस्यानव्यापत्तिस्वा
त्वपत्यतिरेकादित्यर्थः। तृतीये तर्कमाह। वेधकादिति। वेधकेनन्वीपव्याप्तत्वप्रतिशाकपाकजत्वकल्पनादिति भा
वः। कारणतावच्छेदेनेति। आद्ये धनप्रभवत्वस्याहेतोधूमादिकं प्रतिकारणतानिश्चयेनेत्यर्थः। चतुर्थे तर्कमाह। घटे ति। ध्वं
सस्यापि ध्वंसे प्रतियोगितो घटस्य पुनः पराकीर्त्तिप्रसंगेनेत्यर्थः। ध्वंसप्रागभावानधिकरणकालस्य प्रतियोग्यधिकरणत्व
तियमादिति भावः। इह मा पाह तत्। प्रतियोगितो ध्वंसोपि यथा प्रागभावस्य ध्वंसस्तथा ध्वंसोपि प्रतियोगिनो ध्वंस इत्युक्तावेव
घटोत्पत्तेन प्रसंगवारणे यो। कार्यकारणभावग्राहकप्रमाणविपर्ययोरन्तरयोः यथाश्रुते कारणीभूतस्यापि शाकपाक
जत्वादेर्व्यापकत्वकल्पना दृशीकनुपपत्तेः। वह्न्याकृतीति। जलत्वादिना द्रव्यत्वाद्यनुमानत्वस्यादित्यर्थः। तदुपजीव्येति।
तत्कार्यकारणभावमुपजीव्येत्यर्थः। द्रव्यत्वजलत्वादिस्थलेपि जलत्वे द्रव्यत्वव्यभिचारिस्वात्संयोगव्यभिचारित्वात्तसं एम
योगत्वावच्छिन्नं प्रति द्रव्यत्वेन समवायिकारणत्वात्परंपरया संयोगत्वावच्छिन्नं द्रव्यत्वावच्छिन्नकार्यकारणभावग्रहोपजीवि

तर्क एव व्याप्तिग्राहक इति भावः। नन्वेवं पक्षे हेतुसाध्ययोः साध्योपाध्योश्च सहचारदर्शनव्यभिचारादर्शनेति श्चयमात्रं व्याप्तिग्राह
कं वक्तव्ये नानुकूलतर्कः। तत्रोपाधौ साध्यव्यापकत्वानिश्चयादुपाधित्वग्रहान्न दोषो न स्यादित्यत आह। यत्र चेति। तत्र संदि
ग्धोपाधित्वमिति। तत्रोपाधित्वसंदेहे दोष इत्यर्थः। तद्धेतुत्वमिति। तद्धेतुत्वे हेतौ साध्यव्याप्यत्वे उपाधित्वे उपाधौ साध्य
व्यापकत्वमित्यर्थः। पक्षहेतौ तर्कावतारस्तद्धेतौ साध्यव्याप्यत्वनिश्चयः। पक्षसाध्ये तर्कावतारस्तदोपाधौ साध्यव्यापकत्व
निश्चय इति भावः। नन्वेवं पक्षेतरस्योपाधित्वनिश्चयाभावे उपाधित्वसंदेहे दोषो स्वित्यत आह। पक्षेतरस्येति। स्वव्याघा
तकत्वेन उपाधिमात्रस्य दूषकताव्याघातप्रसंगेनानेन संदिग्धोपाधिरपि। पक्षेतरस्योपाधित्वसंदेहे पि न दोषः। दूषकतापात
तः। उपाध्यंतरस्योपाधित्वसंदेहे हेत्वपक्षेतरस्योपाधित्वसंदेहे नापि व्यभिचारसंशयजनकताबाधकाभावात्। नहि प्रयोजन
तानिमित्तप्रसंगीकार्यं जनयति। न वा प्रयोजनतानिः पक्षेतरपक्षपर्यवसितानुकूलतर्कैस्तस्य हेतोरसाध्यव्यापकत्वनिश्चित
तदनुकूलतर्कोपष्टंभे तरव्यभिचारित्वे साध्यव्यभिचारित्वव्याप्यत्वनिश्चयो जातस्तदेव व्यभिचारानुमाने पक्षेतरातरस्योपा
धित्वसंशयात्संभवेन व्यभिचारानुमानसंभवात्। नन्वेवं पक्षेतरस्योपाधित्वसंदेहे हेतुव्यभिचारसंशयापत्तौ व्यभिचारसंश
य एव न प्रतिबंधकोऽस्तीति वाच्यम्। नहि व्यभिचारज्ञानत्वेन प्रतिबंधकता पक्षेतरत्वादिनोपाधितत्त्वानाजन्यत्वपक्षेपि व्यभि
चारसंशयात्मत्वं वा प्रतिबंधकतावच्छेदके अनुप्रविशतो गौरवान्मीनाभावाच्च। वस्तुतस्तु। विशेषादर्शनदशायां मुपाध्यंतर
स्योपाधित्वसंदेहे हेत्वपक्षे पक्षेतरस्योपाधित्वसंदेहे समानोपि न भव सेवा परं तु कपक संग्रहापानुरोधात्पापां सं

सू०टी० 12

त्विन्धोपाधित्वेनपक्षेतरेणोद्भाव्यते इत्येवं तत्त्वात् साध्यव्यापकतापक्षमात्रं व्यसाध्यव्यापकताकोटिमात्रं व्यसाध्यव्यापकताको
कसंदेहविधया दूषकतायाः तथोपकत्वात् संभवेदिति। यदि मदुक्तगतिं नुसरणीयेति भावः। पक्षोपाधिः पक्षोपाधित्वहानेर्दोषः
साध्यव्याप्येति। साध्यव्याप्यव्यापकत्वहानेनैव यः अनुकूलतर्कोत्तरे हेतौ साध्यव्याप्यत्वनिश्चयादिति भावः। नोपाधिः नो
पाधित्वहाने। नोपाधिदूषणं। नोपाधित्वहाने दूषकं। शंकते व्योऽस्यभावेति। उभयमिति। उपाधिरनुकूलतर्काभावच्छेत्तव पक्षः तद
भावोन्नयने तावव्यस्य भावोन्नयने नाश्रासंगताभावः इति साध्यव्यापकत्वहानापत्तिरिति सर्वः। हेतौ साध्यव्याप्तिग्राहकानु
कूलतर्कसत्त्वे तत्र साध्यव्याप्यत्वनिश्चयात् तद्व्यापकत्वहाने न साध्यव्यापकत्वहानेनप्यादिति भावः। सोपाधाविति। साध्य
तदभावसहचरितसोपाधाविसर्वः। एकत्रेति। अवच्छेदकभेदेनविनेतिशेषः। उपाधिरवश्यंवाच्य इतिपक्ष सामानाधिकरण्य
संसर्गेणोपाधिरवश्यंवाच्य इत्यर्थः। एकव्यक्तिकत्वमिति। वारि हेतुसमानाधिकरण्यसंबंधेनोपाधेरवच्छेदकत्वविना मा
सावच्छेदकतापादुर्वचत्वात् तथा धूमवान्वह्नेरित्यादौ च नैकव्यक्तिः साध्यतदभावसमानाधिकरणः। तत्र द्रव्यसत्त्वादिसत्वाद्यव
च्छिन्नगुणविशिष्टसत्तात्वद्रव्यवृत्तित्वादिकमेवावच्छेदकं भवितुमर्हतीति वाच्यं। सामानाधिकरण्यसंसर्गेण गुणघटत्वद्रव्य
त्वाद्यपेक्षयास्य गुरुत्वात्। न च घटत्वादिकमेव सामानाधिकरण्यसंबंधेनावच्छेदकं भवितुमर्हतीति वाच्यं। सामानाधिकरण्य
संबंधेनावच्छिन्नस्य साधनस्य साध्यसमानदेशित्वादिति भावः। आवश्यकत्वादिति। अन्यथा साध्यव्यापकताहानापत्तेरिति भावः।
विनिगमकाभावादिति। एतदुपपादनाय साध्यसंबंधितावच्छेदकत्वेनोपाधित्वलक्षणसाध्यव्यापकत्वेऽपि तस्योपाधित्वे नेकदेशदोषः
स्यात् उपजीव्यत्वेनानुकूलतर्काभावस्यैव दोषत्वसंभवात् तया पालकतया। उपाधित्वहानानुकूलतर्काभावपोषकतयोपजीव्योपजीवक तम

भावो न कार्यकारणभावः । असमवायिकारणवाऽप्यप्रयोजकभावः । तस्य प्रतिबंधकतापादकभावादिति गमकत्वात् । तत्त्वे तोरेवेतिव्याप
स्यकारणतामेवाविनिगमकत्वात् । अन्यतरएव परं परयायप्यापकर्षस्त्विदं पयोगित्वमवितर्कपा । न चोपजीव्योपजीवकभा
वविरहे हेतौ अनुकूलतर्कस्यावश्यं व्याप्तिग्राहकत्वात् तदभावादेव व्याप्तिग्रहे उपपत्तौ किमुपाधित्वज्ञानस्य हेत्वाभासत्वेनेति वा
च्यं । अनुकूलतर्कस्य व्याप्तिग्रहं प्रत्येव हेतुत्वे तदभावादनुकूलतर्कस्फूर्तिर्नास्ति प्रकारान्तरेण च व्यभिचारग्रहे विना तिस्य
मचोपाधिज्ञानेनैव तेन तद्व्याप्तिग्रहप्रतिबंधेन तद्दोषताया आवश्यकत्वादित्यपूर्तं तापद्यो दूष्यत्वेति वैशिष्ट्यं लक्ष्मी
यार्थः साधनत्वेन समानाधिकरणवृत्तिपूर्वस्वीयं । तथा च पक्षधर्मवृत्तिविशिष्टस्य पदधर्मावच्छिन्नप्रतियोगिताकाभावबि
शिष्टस्य पक्षस्य साधनस्याधिकरणे साध्यं निवर्तते साध्याभावो वर्तते तद्धर्मावच्छिन्नत्वं तत्र हेतावुपाधित्वमिति तत्वर्थः । उद्भू
रूपत्वाद्यभावविशिष्टस्य पक्षस्य साधनस्याधिकरणे वायौ घाटे प्रत्यक्षाद्यभावस्य सत्त्वान्नाविशिष्टसाध्यव्यापकत्वं व्याप्तिः । एवं
च यद्धर्मावच्छिन्नप्रतियोगिताकाभावाधिकरणीभूतं साधनं तावच्छेदकावच्छिन्नाधिकरणे साध्याभावाधिकरणं तद्धर्मा
वच्छिन्नत्वमुपाधित्वमिति फलितं । तेन द्रव्यत्वविशिष्टसत्त्वादिसाध्ये विशिष्टस्यानातिरिक्तत्वे विगुणत्वत्वा हेतो नातिव्याप्तिः । तत्
पक्षानुद्भूतरूपत्वादि स्याद्धेतु प्रत्यक्षत्वघटत्वाद्यभाववत्त्वन्नलक्ष्यः । तथा महाकालान्यो घटादिस्याद्धेतुः कालभेदादिरपि नलक्ष्यः ।
यद्भूमान्यूमादि स्याद्धेतुमहानसत्वाद्यभावाधिकरणस्य जलह्रदादेः साध्याभावाधिकरणत्वेऽपि तदधिकरणीभूतस्य साधना
धिकरणस्य साध्याभावानधिकरणत्वान्महानसत्वादावतिव्याप्तिः । न चैवं द्रव्यत्वाभाववान्गुणकर्मान्यत्वादित्यादौ साधनं वा
पक्षसंयोगाभावादावतिव्याप्तिः । एवं योगाभावाभावाधिकरणे साधनवति द्रव्ये द्रव्यत्वाभावाभाववस्य सत्त्वादिति वाच्यं ।

मू॰टी॰ अधिकरणे पदेन निरवच्छिन्नाधिकरणत्वाश्रयस्य विवक्षितत्वात् अत्रापि साध्यसमानाधिकरणवृत्तित्वेन तद्धर्मविशेष-
णीयः । तेन धूमवान् वह्नेरित्यादौ द्रव्यत्वाद्यभावाधिकरणे आलोकादौ धूमाद्यभावसत्वेपि द्रव्यत्वादौ नातिव्याप्तिरिति संक्षे-
पः । अन्ये तु अपि चारेण्वाद्येकत्वे न दूषकत्वं परोक्तलक्षणतावच्छेदकमुक्तौ तत्रापि परोक्तव्यापकत्वेन दूषकत्वेन वेलक्ष-
13 णतावच्छेदकमाहुः सच्चेतिास वेसर्प्यः । धमेतत्वनंतरमुपाधिरित्यनुषज्यते । पक्षस्याभावादिति पक्षेपदभावात् पक्षतावच्छेद-
कावच्छेदेन वर्तमानत्वस्याभावात् साध्यसाधनसंबंधाभावादिति योजना । प्रयोजकत्वं पंचम्यर्थः । तच्च व्याप्यत्वमेव । पक्षाव-
पक्षतावच्छेदकावच्छेदेन वर्तमानपदमावश्यकं: साधनविशिष्टसाध्याभावदृत्यर्थः । साधनपदं पक्षवृत्तिधर्मिपरं । तेना-
पं गोत्वश्वत्वादिनाऽदि विहसपक्षीयसाध्याभाववत्वाद्युपाधौ वायुः प्रत्यक्षः प्रमेयत्वादित्यादौ पक्षधर्मावच्छिन्नसाध्यव्यापको-
द्भूतरूपवत्वादौ चनाव्याप्तिः । एतदभावस्यापि द्रव्यत्ववह्नि द्रव्यत्वादिरूपपक्षे किंचित्पक्षवृत्तित्वमविशिष्टसाध्याभावव्या-
प्यत्वात् पक्षतावच्छेदकावच्छेदेनावर्तमानत्वाच्च । एवमग्रेपि सर्वत्र साधनपदं पक्षवृत्तित्वपरं एवं च पक्षधर्मावच्छिन्नाभावः
पक्षवृत्तिधर्मावच्छिन्नसाध्याभावव्याप्यः पक्षतावच्छेदकावच्छेदेन वर्तमानश्च तद्धर्मावच्छिन्नत्वमुपाधित्वमितिफलितं । वायुः
प्रत्यक्षः प्रमेयत्वाद् गोत्वादि भिन्नानन्तयः स्यात्मो भिन्नानानवत्वादित्यादौ पक्षधर्मावच्छिन्नसाध्यव्यापको द्भूतरूपशाकपाकजत्वादावव्याप्तिर्वा-
रणाय वच्छिन्नान्तं साध्यविशेषणं । पर्वतो वह्निमान् धूमादित्यत्र धूमवान्वह्नेरित्यादौ महानसत्वादावतिव्याप्तिरित्यतः किंचिद्
मेति विहाय पक्षवृत्तिधर्मेत्यभिहितं । नच तथाप्ययमयोगोलकं धूमवद्वह्नेरित्यादौ महानसत्वादावतिव्याप्तिः तदभावस्यापि म- राम
हानसायोगोलकान्यतरत्वादिरूपपक्षवृत्तिधर्मावच्छिन्नसाध्याभावव्याप्यत्वादितिवाच्यं तत्र तत्स्थलस्यात्राः महानसा

योगोलकान्यतरत्वरूपपक्षवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वेऽपि पक्षावृत्तितयावच्छिन्नमाणुलक्षणोकान्तत्वात्सर्वैःसाध्यसमा
नाधिकरणः स्वरूपासिद्धः प्रदेशे सर्वाश्रयेषां सत्त्वसाध्यव्यतिरेके केनेति सिद्ध्योना ज्ञा । पक्षे सर्वाश्रये पक्षसत्त्वे सत्यश्रये सर्वे स्थित्व
त्तु तावच्छेदकाश्रयवृत्तित्यावकः । पक्षतावच्छेदकावच्छेदेन वर्तमानत्वोपाधिना सर्वे तो वह्निमान्धूमा दूषं वह्निमान्धूमादि
त्यादे वह्निसामग्र्यादेर्व्युदासः दृष्टे वह्निमान्धूमादित्यादौ वह्निसामग्र्या दिष्टू संज्ञा घट एव । स्वत्वापि पक्षेतरत्वेन दूषक
ता मते साधनव्यापकत्वापि पक्षावृत्तेरुपाधित्वात् अव्याधिनसाध्यवत्त्वस्वली पोपाधितेसंग्राह्य इति पर्यवसितो धूमवान्वह्ने
रित्यादावार्द्रेन्धनादेर्नाव्याप्तिरिति भावः । नन्वेवं पक्षतावच्छिन्नप्रतियोगिताकाभाववद्विशिष्टसाध्याभाववत्त्वे पक्षवृत्तित्व
धर्मावच्छिन्नत्वमुपाधित्वाभिमतेवक्तव्यं तावच्छेदकमस्तु लाघवादिति वाच्यं । तत्रापि पक्षतावच्छेदकांतरत्वात् । पक्षताव
च्छेदकांतरसंभवस्थले पक्षतावच्छेदकाहेतुत्वात् पक्षतावच्छेदकगौरवस्याप्य किंचित्करत्वात् एतदेवाह पक्षतावच्छेदकेह
यमयोगोलके धूमवान्वह्नेरित्यत्र प्रसाध्यव्यापके आर्द्रेन्धने ऽयोगोलके संगमयति । इत्येति । व्यावर्त्तनीति हीति । व्यावर्त्तते
ह्रिधूमवत्वेतद्घावृत्यस्याऽयोगोलक इति योजना । तद्घावृत्येस्यन्तापि वैशिष्ट्यमितीपार्थः । तथा वह्निपक्षतत्वावृत्तिविशिष्टेऽयो
योगोलके साधनाधिकरणे धूमवत्वघावर्त्तते धूमस्याभावो वर्त्तते इत्यर्थः । एतेन प्रपक्षस्य पक्षतावच्छेदकमुपपादितं । ननु तत्पापि
आव्यवस्थामे द्वितीयपक्षतावच्छेदकत्वेनार्द्रेन्धने ऽव्याप्ये वनर्द्रभावाधिकरणे पक्षीभूते ऽयोगोलकेऽप्युद्भूतसाध्याभाववत्त्वावि
पक्षवृत्तिधर्मस्यापि शेषणस्यसत्वे न तद्विशिष्टसाध्याभाववत्त्वादिसिद्धमात्राह — अतएवेति । साध्याभाववत्त्वादेहेते स्पर्शनतद्वेति । सा
ध्यसाधनसंबंधाभावस्त्वपदकृतीतियोजना । साध्यसाधनसंबंधाभावः । साधनविशिष्टसाध्याभावः । तद्धीनसाधायोगोलकान्यतर

मू.टी.

15

त्वादिरूपपक्षतावृत्तिधर्मविशिष्टसाध्याभाव इति यावत्। तत्र पक्षे अयोगोलककालरूपे पक्षे शुद्धसाध्याभावसत्त्वे विशेषणासत्त्वे विशेष्या-
भावात् साधनविशिष्टसाध्याभावः। महानसीयगोलकान्यतरत्वावच्छिन्नस्य विशिष्टसाध्याभावस्यावश्यं कत्वादिति भावः। ननु नि-
त्यपि ध्वंसोऽनित्यो जन्यत्वादित्यत्र जन्यत्वरूपसाधनावच्छिन्नव्यापकीभावत्वप्रतियोगितावच्छेदकस्याव्याप्तिः। तत्र साधनाधिकरणे
ध्वंसे जन्यत्वरूपपक्षधर्मविशिष्टानित्यत्वाभावस्य ध्वंसो न जन्यत्वे सति अनित्यः भावत्वाभावादित्यनुमानसिद्धत्वेप्यनित्यत्वसामा-
न्याभावरूपस्य शुद्धसाध्याभावस्य साधनाधिकरणे सत्त्वे मानाभावात्। एवं वायुर्बहिरिन्द्रियप्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्र द्रव्य-
त्वरूपपक्षधर्मावच्छिन्नसाध्यव्यापकोद्भूतरूपवत्त्वे तस्याव्याप्तिः। तत्रापि साधनाधिकरणे वायौ द्रव्यत्वरूपपक्षधर्मावच्छिन्नब-
हिरिन्द्रियप्रत्यक्षत्वाभावस्य वायुर्न द्रव्यत्वे सति बहिरिन्द्रियप्रत्यक्षः उद्भूतरूपवत्त्वाभावादित्यनुमानसिद्धत्वेपि बहिरिन्द्रियप्रत्य-
क्षत्वरूपस्य शुद्धसाध्याभावस्य साधनाधिकरणे सत्त्वे मानाभावादित्यत आह। एवमिति। ध्वंसे पक्षीभूते ध्वंसे जन्यत्वानित्यत्वयोः
संबन्धः जन्यत्वरूपपक्षधर्मविशिष्टोनित्यत्वाभावो निवर्त्तमानो निवृत्तिप्रतियोगितेन नाशरहितविषयी भवतु न। पक्षधर्मतावलादि-
ति। जन्यत्वरूपस्य विशेषणस्य पक्षवृत्तितानिश्चयसहकारादित्यर्थः। अनित्यत्वाभावमनित्यत्वाभावरूपशुद्धसाध्याभावं तत्प्रति-
निवर्त्तमाने निवृत्तिप्रतियोगित्वेन ज्ञापयमाने। द्रव्यत्वे सतीति। द्रव्यत्वविशिष्टबहिरिन्द्रियप्रत्यक्षत्वमित्यर्थः। निवर्त्तयन्। निवृत्तिप्रतियो-
गित्वेनानुमापयन्। प्रत्यक्षत्वाभावमापादयेति। बहिरिन्द्रियजन्यप्रत्यक्षत्वाभावरूपं शुद्धसाध्याभावमापादयेत्यर्थः। सिध्यतीति। द्रव्यत्वविशि-
ष्टबहिरिन्द्रियजप्रत्यक्षत्वनिवृत्तिः सिध्यति। न पार्थेति। साध्याभावसिध्या। शुद्धसाध्याभावसिध्या। साध्यसाधनसंबन्धोस्तीति। सा- राम
धनाधिकरणे शुद्धसाध्याभावो नास्तीत्यर्थः। प्रकृते पक्षस्यैव साधनाधिकरणत्वादिति भावः। स्वव्याघातकत्वेन। स्वं साध्याभावः। तद्दृश्या

वसाधकत्वेन साध्याभाववदवृत्तित्वेनेति पाठः। साध्याभाववदवृत्तित्वादिति। साधनाधिकरणे साध्याभावासमानाधिकरणत्वा
दित्यर्थः। पक्षत्वेतिधर्मविशिष्टसाध्याभाववदवृत्तित्वाच्चेति बोध्यं। सांप्रदायिकास्तु। अन्ये च चलनहेतुसाध्यहेतुतावच्छेदकारोपावच्छेदकत्वे
न दूषकत्व पक्षे लक्ष्यतावच्छेदकमुक्तासत्त्वमिति पक्षे लापकत्वेनोपाधेर्दूषकत्वे पर्वतेति तन्मते लक्ष्यतावच्छेदकमाहुः अ
न्वेत्विति। पक्षेति। यस्य साधनस्य पक्षावृत्तित्वेऽपि जनतासर्वस्मिन्नपि अन्यत्र हेतुविशेषः। यस्य साधनस्य स्वेतरत्वयेन केनचित्तत्वं
धेन संबन्धित्वं स्वप्रत्यर्थः। अत्र त्वयपदस्य यदि स्वेत्र तत्पावकसहायो वायुनकेनोविशेषेण च साधनसंबन्धितोपस्य व्याप्तस्य
सह सर्वस्मिन् पक्षे साध्यस्य निवर्तितो साध्याभावोवर्तते सत्तत्त्वे हेतावुपाधिरित्यर्थः। उदाहरणमाह धूमावेतसहायपिशाचस्य त्वचो घमा
वः सर्वस्मिन् पक्षे वर्तमाने येन नविशिष्टसाध्यव्यापकेः व्याप्तिः येन केनापि संबन्धेन पक्षधर्मसंबन्धित्वमेवोपाधित्वव्यवहार
प्रयोजकमिति बोधनाय पदसंबन्धिनः त्वं तावदस्य विशेषणेन तृणत्व घटकं वर्तनमात्र मिवच्छिन्नप्रतियोगिताका
भाव विशिष्टस्य साध्याभाववस्याधिकरणं तत्र सर्वत्वमुपाधित्वमित्येव लक्षणं पर्वतो वह्निमान् धूमादित्यादौ महानसत्वाघ
भावविशिष्टस्य साध्याभावस्याधिकरणं न पक्ष इति न तत्राति व्याप्तिः। अयो गोलकं धूमवद्वह्नेरित्यत्र महानसत्वादिकं च
लक्षणमेव धूमवद्वह्निमत्त्वमादिस्थादौ वह्निसामग्र्याद्यभावविशिष्टसाध्याभावस्य पक्षे वृत्तित्वेऽपि न सकलपक्षवृत्तित्वमतो
नातिव्याप्तिः। सत्प्रतिपक्षोन्नायकहेतौ न दूषकत्वपक्षे साधनव्यापकस्यापि पक्षावृत्तेरूपाधिस्सा साध्यव्यापकसाधनव्या
पकस्यापि पक्षावृत्तेरुपाधित्वात् तन्मतेन नद्धेतोः वह्निमान् धूमादित्यादौ वह्निसामग्र्याद्यव्याप्तिः। पर्वतो धूमवान् वह्नेरि

म.टी. सवाधितत्वस्यले आर्द्रेन्धनात्प्रभववह्निर्वा साध्यसमानाधिकरणत्वेन वक्तव्यमविशेषणानि यः। तेनायोगोलकं धूमवद्वह्नेरित्यादौ
साध्यविरुद्धत्वे सति त्वाद्धेतुनकोपि दोषः। लक्षणावच्छेदकसमुदायालक्षणत्वात्। मा हः। समवधर्मे इति। यस्याभावादिति। पर्वे वह्न्याभावेनाल
